National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(68): 127-129
© 2026 NJHSR
www.sanskritarticle.com

ज्योत्सनाराठौर:
शोधच्छात्रा, वास्तुविभाग:,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालय:, नवदेहली

शोधनिर्देशक: -
डॉ.दीपकवशिष्ठ:,
सहायकाचार्य:, वास्तुविभाग:,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालय:, नवदेहली

Correspondence:
ज्योत्सनाराठौर:
शोधच्छात्रा, वास्तुविभाग:,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालय:, नवदेहली

भारतीयज्ञानपरम्परायां वास्तुशास्त्रम्

ज्योत्सनाराठौर:, डॉ. दीपकवशिष्ठ:

वैदिकमुख्यविद्यासु वास्तुविद्याऽप्येका प्रमुखा विद्याऽस्ति यस्यां मानवजीवने पृथिव्यादीनामुपयोगस्य समग्ररूपेण विचारोऽस्ति येन मानवस्य शारीरिकमानसिकक्षमतानामुन्नतिर्भवेत् । वास्तुशास्त्रं तादेव प्राचीनमस्ति यावत्संस्कृतवाङ्मयम् । संस्कृतवाङ्मयस्य विकासेन सहैव वास्तुशास्त्रस्य विकासोऽस्ति। वास्तुशास्त्रस्य वर्णनं वेदवेदाङ्गपुराणरामायणमहाभारतादिषु संस्कृतवाङ्मयस्य विभिन्नेषु ग्रन्थेषु पर्याप्तरूपे मिलति । संस्कृतसाहित्यस्य सर्वादिग्रन्थ ऋग्वेदोऽस्ति । ऋग्वेदस्यानेकेषु सूक्तेषु वास्तुसम्बद्धं वर्णनमुपलभ्यते। ऋग्वेदस्य ऋषिणा वशिष्ठेन विरचितस्त सप्तममण्डलस्य 54 तमसूक्तं वास्तोष्पतिभगवन्तं समर्पितमस्ति। अस्य सूक्तस्य वैदिकदेवो भगवान् वास्तु अस्ति। अयं वास्तुदेवो गृहपालकः रक्षकदेवश्च स्वीक्रियते ।[1] सूक्ते अस्मिन् वास्तोष्पतेः स्तुतिं कुर्वन् उक्तं यत् हे वास्तोष्पते ! अस्माकं जागरणं कुर्यात् । अस्माकं गृहेषु पुत्रपौत्रादिद्विपदां गवाश्वादिचतुष्पदां नीरोगं स्थास्थ्यञ्च कुर्यात्। यद्धनं वयं याचयामः तद्वृणीस्व ।[2] पुनः प्रार्थनाऽस्ति यत् हे वास्तोष्पते ! अस्माकं कृते कल्याणप्रदधनस्य विस्तारं कुर्यात् । हे सोम ! भदत्कृपया वयं गावश्वादिभिः संयुक्ताः जरारहितः भवेम । पितेव अस्मान् रक्ष ।[3] ऋषिः पुनः प्रार्थनां करोति यत् हे वास्तोष्पते ! वयं भवदनुकम्पया सुखकारकं रमणीयमेश्वर्यसम्पन्नञ्च स्थानं प्राप्नुमः । आगताऽनागतधने रक्ष । अस्मान् सर्वदा कल्यणाप्रदसाधनैः सुरक्षितं करोतु ।[4]

वैदिकसाहित्ये वास्तुशास्त्रस्य प्रयोगः प्रायः गृहार्थे अथवा निवासार्थे प्रयुक्तः। गृहे निवासस्थाने वा वास्तुपुरुषस्य देवत्वमेकमेव चेतनवस्तु भवति यो मनुष्यस्य सुखदुःखाद्युपलधेर्मुख्यकारणं भवति। ऋग्वेदे आवासीयव्यवस्थया सम्बन्धितानां विभिन्नाशब्दानां यथा छर्दिः[5], दुरोणम्[6], वास्तु[7], शर्मन्[8], सदनम्[9], आदीनां प्रयोगेनापि स्पष्टं भवति यद्वैदिककालेऽप्येकावासीयगृहाणां व्यवस्थाया एकं सदृढविकसित-रूपमवश्यमेवास्तित्वे आसीत्। तस्मिन् काले द्विविधयोरावासीयगृहयोर्वणनं मिलति। प्रथममल्प-साधनसम्पन्नजनेभ्यो मृत्तिकानिर्मितस्य लघुगृहस्य द्वितीयञ्च बहुसाधनसम्पन्नजनेभ्यो यथा नृपादिभ्यः विशालपाषाणदिनिर्मित गृहस्य यत्र निवसन् मानवः सुखसमृद्ध्यादिकं सर्वमाप्नोति स्म ।[10] ऋग्वेदे स्थिरयशोऽन्नावासाद्यर्थं गृहस्य कामनाऽस्ति ।[11]

ग्रामशब्दस्योल्लेखोप्यनेकेषु स्थानेषु वर्णितः ।[12] अनेनेदं प्रमाणितं भवति यत्तस्मात्कालादेव मानवः पूर्णरूपेण गृहसुखस्याभिलाष्यासीत् तस्य सुखस्य च प्राप्त्यर्थमपि प्रयत्नशील आसीत् ।

तृतीये वेदेऽथर्ववेदेऽपि वास्तुविषयस्य वर्णनं प्राप्यते । अत्र यज्ञवास्तौ यज्ञकुण्डयूपस्तूपादीनां निर्माणार्थे वास्तुपदं प्रयुक्तम् । अथर्ववेदस्य तृतीये काण्डे शालानिर्माणसूक्ते शालां प्रति प्रार्थनां कुर्व उक्तं यत् हे शाले ! भवती भोगसाधनैः सम्पन्ना विशालछत्रयुक्ता चास्ति । भवती पवित्रधान्यैरक्षयभाण्डारवत्यस्ति ।[13] शालायामस्यां तरुणाः बालकाः अथ च गमनशीलाभिर्गाभिः सह तासां धेनुवत्सा अप्यगच्छन् । अस्यां मधुरसैः परिपूर्णाः घटाः दधियुताश्च कलशा अपि सन्ति । भवती घटमेनं अमृतमयेन मधुररसेन घृतधारया च सम्यक्तया परिपूर्णं करोतु । पानकर्तॄन् तृप्तं कुर्यात् ।[14] गृहे रोगनाशकजलस्य अग्नेश्च निवास आवश्यकोऽस्ति । अतः वयं स्वयमेव रोगरहितं रोगविनाशकं जलं गृहे अग्निदेवेन सह स्थिरं कुर्मः ।[15] नवमकाण्डेऽपि शालां प्रति प्रार्थनां कुर्वन् उक्तं यत् भवती कल्याणप्रदा शाला अस्माकं शरीराय सुखदायिकाऽस्ति। हे दिव्यसम्पन्ने शाले! भवती भाण्डारगृहयज्ञस्थलस्त्रीकक्षदेवोपासनास्थाना-नामासनैर्युक्ता स्यात् ।[16]

अथर्ववेदे 2, 4, 6, 8, 10 पक्षयुक्तायाः शालायाः निर्माणस्य वर्णनमपि प्राप्यते याः शालाः क्रमशः द्विपक्षा, चतुष्पक्षा, षट्पक्षा, अष्टपक्षा दशपक्षा वोच्यन्ते। कामनेयमप्यस्ति यत् यथा गर्भगृहेऽग्निः स्थिता भवति तद्वदेव तस्यां मानपत्नी-शालायां व्यं समाश्रित्य निवासः प्राप्नुमः ।[17] गृहस्य समस्तसौन्दर्यस्य पराकाष्ठायै तां शालां नवविवाहितकन्येव सज्जाकरणाय निर्दिष्टमस्मिन् सूक्ते । अनेन सहैव शालायाः पूर्वदक्षिणपश्चिमोत्तरध्रुवोर्ध्वादिदिशोऽमथ चाग्नेयनै-ऋत्य-वायव्याद्युपदिशः महिमार्थं शालामेनां नमनपि कृतम् ।[18]

अथर्ववेदस्योपवेदे स्थापत्यवेदे स्वतन्त्ररूपेण वास्तुशास्त्रस्य सिद्धान्तानामेव वर्णनं प्राप्यते। स्थापत्यस्यार्थो निवासयोग्या स्थापना इत्येवास्ति। स्थापत्यवेदोऽयमेवोत्तरकाले वास्तुशास्त्ररूपे प्रख्यातोऽभवत् ।

वैदिककाले गृहनिर्माणमेव वास्तुनाम्ना ज्ञायते स्म। तत्कालीने युगे लघुदीर्घादिभेदेन सर्वविधानां गृहाणां निर्माणमासीत् । ऋग्वेदे बृहन्मानयुक्त तादृशस्य गृहस्यापि वर्णनं प्राप्यते यस्मिन् सहस्रद्वाराण्यासन् ।[19] अथर्ववेदे एकस्मिन् स्थाने गृहस्योपमाऽलङ्कृतहथिन्या सह कृता ।[20] तत्कालीनसमये भवननिर्माणास्याधारः केवलं काष्ठन्नासीदपितु मृत्तिकेष्टिकापाषाणादयोऽप्यासन्। ऋग्वेदे एकस्मिन् स्थले प्रार्थनाऽस्ति यदहं मृत्तिकानिर्मित्ते गृहे निवासमिच्छामि। अस्माकं निवासस्थानमत्यन्तं मनोहरमतिसुन्दरञ्च भवेत् ।[21] अथर्ववेदे पाषाणनिर्मितभवनस्योल्लेखोऽपि मिलति। अथर्ववेदस्य पञ्चमकाण्डस्य दशमसूक्तस्य प्रथमसमन्त्रेषु अश्मवर्यशब्दस्य पुनः पुनः प्रयोगोऽस्ति यस्यार्थोऽस्ति पाषाणनिर्मितं गृहम् ।[22] ऋग्वेदे एकस्मिन् स्थले लौहनिर्मित्तगृहस्योल्लेखोऽपि प्राप्यते ।[23]

संहितानामनन्तरं ब्राह्मणसूत्रग्रन्थेषु गृहवास्तोर्विस्तरेण वर्णनं प्राप्यते। शतपथब्राह्मणे गृहस्य विभिन्नकक्षानामद्वितीयं वर्णनं मिलति । अस्यानुसारं गृहं द्वयोर्भागयोर्विभाजितमासीत् । प्रथमो भागः पूर्वार्धो यत्र पुरुषा उपविशन्ति सभां च कुर्वन्ति सम । अस्मिन् सदने एकस्य विशालस्तम्भस्य निर्माणमासीत् यस्य वरसिष्ठस्थाणुराजः'[24] इति सञ्ज्ञाऽऽसीत्। गृहस्य पृष्ठभागे स्त्रीसदनम् अथवा अन्तपुरस्य निर्माणमासीद्यस्य परिमाणं पर्याप्तमासीत्। यादृशी वरीयसी पृथुश्रेणी वा स्त्री तदनुरूपमेव शालायाः निर्माणम् क्रियते स्म ।[25]

गृहभवनयोराधारयोरपि विशेषरूपेण ध्यानमासीत् । तदनुसारमेव दृढताविधानमासीत्।[26] सूत्रग्रन्थेष्वपि वास्तुविषयकवर्णनान्युपलभ्यन्ते। शूलसूत्रेषु प्रतिपादितयज्ञवेद्याः परिकल्पना वास्तुशास्त्रस्याधारशीलाऽस्ति। बौधायनशुल्बसूत्रे यज्ञवेद्याः आकारनिर्माणचरणपरिमाणाश्च विधिरुक्तः। बौधायनशुल्बसूत्रे यज्ञवेदीनिर्माणाथं बहूनाम् आकाराणां वर्णनं वर्तते, यथा—समद्विबाहुस्त्रिभुजम्, आयतः, सममितः समलम्बचतुर्भुजश्च इति।[27] कात्यायनशुल्बसूत्रे यज्ञवेदीनिर्माणस्य नियमाः, आकाराः, मापननिर्माणञ्च इत्येतेषां सर्वविषयाणामुल्लेखा प्राप्यन्ते।[28] तत्रैव आश्वलायनसूत्रे वास्तुदेवतायाः[29], पारस्करगृह्यसूत्रे च वास्तोष्पतेः[30], शालाकर्मणः, गृहनिर्माणमुहुर्तस्य, गृहभूमिनिरूपणस्य, गृहद्वार-शिलान्यासस्य च विविधानां विषयाणां वर्णनं लभ्यते। शुल्बसूत्रग्रन्थेषु तत्र तत्र विविधानां वेदीनां चित्तीनाञ्च चर्चा वर्तते। यज्ञवेद्यां प्रयुक्तानां विविधाकृतीनां भिन्न-भिन्नपरिमाणानां च इष्टकानां निर्माणं तासां गणनापद्धतिश्च गणितशास्त्रदृष्ट्या शिल्पशास्त्रदृष्ट्या च वर्णिता अस्ति। वर्णनमिदमत्यन्तं महत्त्वपूर्णमप्यस्ति ।[31]

गोभिलगृह्यसूत्रे प्रयुक्तानां द्वाराणां गृहं परितः रोपणीयानां वृक्षाणाञ्चोल्लेखः प्राप्यते। अत्र कथितं यत् गृहे प्रवेशार्थं कियन्तोऽपि द्वाराः स्युः, किन्तु तेषां द्वाराणां सदृशमकमन्यद् द्वारमपि भवेत्। अत्र पूर्वमुख-उत्तरमुख-दक्षिणमुखद्वाराणि उत्तमानि कथितानि। यशोबलं कामयमानाः पूर्वमुखं द्वारं, पुत्रपशून् इच्छन्तः उत्तरमुखं, तथा च सर्वविधाः कामनाः पूरयितुं दक्षिणमुखं द्वारं धारयेयुः।[32] एतदनुसारं गृहद्वारं तादृशं भवेत् यथा गृहस्य अन्तःस्थितो मनुष्यो बहिर्द्वारात् न दृश्येत् ।[33] गोभिलगृह्यसूत्रे गृहस्य परितः प्रशस्तवृक्षाणां त्याज्यवृक्षाणां च वर्णनं लभ्यते ।[34] अत्र भूमिसंस्कारविषये वास्तोष्पतिहोमादीनामपि वर्णनं विद्यते।

कालान्तरे गृहाणां विकासेन सह ग्रामनगरमहानगराणां च विकासोऽभवत्। एष सर्वोऽपि विकासः वास्तुशास्त्रान्तर्गतः कृतः, येन वास्तुक्षेत्रे पर्याप्तः विकासः जातः। लौकिकसाधनेष्वपि वाल्मीकिरचिता रामायणम्, भरतमुनिकृतं नाट्यशास्त्रम्, महाभारतम्, शुक्रनीतिः, कामसूत्रम्, अर्थशास्त्रं तथा च बौद्धजातकादयः प्राचीनग्रन्थाः सन्ति, येषां कालविषये निश्चितं ज्ञानं तु न भवति, किन्तु एतेषु वास्तुविषयिणी सामग्री प्रसङ्गवशात् उल्लिखिता दृश्यते, या वास्तुशास्त्रस्येतिहासदृष्ट्या अत्यन्तं महती मूल्यवती च वर्तते। वाल्मीकिरामायणे भारतीयवास्तुकलायाः अत्युन्नतदशायाः चित्रणं कृतमस्ति। तत्र काञ्चनपुर्याः, प्रासादानां, दुर्गाणां, विमानादीनां च विस्तृतं विवरणं लभ्यते। देवाऽसुरयोः प्रधानस्थापत्यविद्योः विश्वकर्म-मययोः बहुवारमुल्लेखः प्राप्यते।[35] नाट्यशास्त्रे नाट्यशालायाः सन्निवेशप्रसङ्गे एव वास्तुसम्बन्धिनां सामान्यानां विषयाणां वर्णनं जातम्। यथा-भूमिचयनम्, तस्याः परिमार्जनम्, विस्तारपरिमाणस्य निर्धारणम्, नाट्यशालायाः मानचित्रम्, शिलान्यासस्य धार्मिकविधिः, ब्राह्मणादिचतुर्वर्णानामाधारेण चतुर्विधाः स्तम्भा इत्यादयः ।[36] महाभारतकाले वास्तुविद्यायाः पूर्णरूपेण विकासस्य प्रमाणानि बहुषु स्थानेषु लभ्यन्ते। यथा-पाण्डवानां सः राजप्रासादः, यः स्थले जलस्य तथा च जले स्थलस्य भासं कारयति स्म, यस्माद्भवननिर्माणकलायाः अद्वितीयकौशलस्य प्रमाणिकता सिद्धा भवति । श्रीकृष्णस्य कथनेन मयदानवेन तस्य निर्माणं कृतम् आसीत् ।[37] इन्द्रप्रस्थनगरस्य विषये यत् विवरणं महाभारते आदिपर्वणि प्राप्यते, तत् नगरनिर्माणयोजनामाप्रकाशयति ।[38]

यद्यपि शुक्रनीत्यां राजभवननिर्माणादिवास्तुविज्ञानविषयक-उल्लेखाः प्राप्यन्ते,[39] परन्तु विस्तृतं विवेचनं प्रतिमालक्षणस्थानादिविधीनां कृतमस्ति। प्रासादानामप्यत्र विस्तृतं वर्णनं लभ्यते। प्रासादानां प्रकाराः रचनादयश्च विषयाः अत्र वर्णिताः सन्ति।[40] कौटिल्यस्य

अर्थशास्त्रेनापि स्पष्टं भवति यत् अस्मिन् युगे वास्तुविज्ञानमत्यन्तं प्रसिद्धमासीत्। अर्थशास्त्रे भवनानि, तेषां निर्माणकला, मनोरञ्जनस्थलानि, उपवनानि, सेतुबन्धाः, सरोवरादयश्च 'वास्तु' इति सञ्ज्ञया अभिहिताः आसन्।[41] वस्तुतः वैदिककाले वास्तुशास्त्रस्य जन्म अभवत्, परन्तु तस्य पूर्णरूपेण विकास आगमपुराणकालयोर्दृश्यते।

मत्स्यपुराणे वास्तुविज्ञानस्य क्रमानुसारं वर्णनं प्राप्यते। यथा— वास्तुपुरुषोत्पत्तिः, भूपरीक्षणं, वास्तुपदविन्यासः, सर्वतोभद्र-नन्द्यावर्त-वर्धमानादि-भवनानाम् उल्लेखः, द्वारवेधः, गृहपरिसरे वृक्षारोपणं, गृहस्य पाकशालादि-कक्षाणां स्थितिः, वास्तुबलिः, गृहप्रवेशविधिः च ।[42] मत्स्यपुराणमतिरिच्यान्येष्वेकादशपुराणेष्वपि वास्तुकलायाः वर्णनं लभ्यते। मत्स्यपुराणस्य अष्टासु अध्यायेषु, गरुडपुराणस्य चतुर्षु अध्यायेषु, अग्निपुराणस्य त्रिषु अध्यायेषु, भविष्यपुराणस्य एकस्मिन् अध्याये, विष्णुधर्मोत्तरपुराणस्य च त्रिपञ्चाशदध्यायेषु वास्तुकलायाः उल्लेखः प्राप्यते, येषु वास्तुविद्यायाः सर्वेषां पक्षाणां विस्तरेण प्रतिपादनं कृतम् अस्ति।

संदर्भ

1 निरुक्तम्, 10/17

2 वास्तोष्पते प्रतिजानिह्यस्मान्त्वावेशो अनमीवो भवा नः । यस्त्वेमहे प्रति तन्नो जुष्स्य शं नोभवद्विपदे शं चतुष्पदे । ऋग्वेदः, 7/54/1

3 वास्तोष्पते प्रतरणो न एधि भयस्कानो गोभिरश्वेभिरिन्दो। जरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति तन्नो जुष्स्व । ऋग्वेदः, 7/54/2

4 वास्तोष्पते शग्मयो संसदा ते सक्षीमहि स्वम्या गातुमत्या । पाहि क्षेम उत योगे बरं नो यूयं पात स्वस्तिभिः सदा नः ।
ऋग्वेदः, 7/54/3

5 अधा ह यन्तो आश्विना पृक्षः सचन्त सूरयः । ता यंसतो मधवभ्यो ध्रुवं यशश्छर्दिरस्मभ्यं नासत्या । ऋग्वेदः, 7/74/5

6 येषामेक्ता कृतहस्ता दुरोण.... न शर्म दीर्घश्रुत । ऋग्वेदः, 7/16/8

7 ता वां वास्तून्युश्मसि.... पदमव भाति भूरि । ऋग्वेदः, 1/184/6

8 भारद्वाजाय सप्रथः शर्म यच्छ.... वरेब्धं वसु ।
ऋग्वेदः, 6/16/33-37

9 श्रुधी नो अग्ने सदने.... भूरहि स्याः । ऋग्वेदः, 10/11/9

10 भो षु वरुण मृन्मयं गृहं ... सृष्ट्या...।ऋग्वेदः, 7/89/1

11 ऋग्वेदः, 7/74/5

12 क) अग्ने पूर्वा अनूषसो ... मानुषः । ऋग्वेदः,10/4/10
ख) इमा रुद्राय तवसे अस्मिन्नन...ऋग्वेदः,1/114/1
ग) यस्याश्वास...........वरम् जनास इन्द्रः । ऋग्वेदः, 2/12/7

13 धरुण्यसि शाले.....सायमास्पन्दमानाः । अ.वे., 3/12/3

14 एमां कुमारस्तरुण आ........ कलशैरगुः । अथर्ववेदः, 3/12/7

15 इमा आपः प्र भराम्ययक्ष्मा .... सहाग्निना । अथर्ववेदः, 3/12/9

16 हविर्धानमग्निशालं ....देविशाले । अथर्ववेदः, 3/3/7

17 या द्विपक्षा चतुष्पक्षा यामिमीयते ।
अष्टापक्षां दशपक्षां शालां मानस्य पत्निमग्निर्गर्भ इवा शये ।

18 मा नः पाशंप्रति मुचो .... भरामसि ।।24।।
प्राच्यादिशः शालाया...... स्वाहेभ्यः ।।25।।
दक्षिणाया दिशः ....देवेभ्य स्वाहेभ्यः ।।26।।
प्रतीच्या दिशः .... देवेभ्य स्वाहेभ्यः ।।27।।
उदीच्या दिशः .... देवेभ्य स्वाहेभ्यः ।।28।।
ध्रुवाया दिशः .... देवेभ्य स्वाहेभ्यः ।।29।।
ऊर्ध्वाया दिशः .... देवेभ्य स्वाहेभ्यः ।।30।।
दिशोदिशः शालाया .... देवेभ्य स्वाहेभ्यः ।।31।।
(अथर्ववेदः, 9/3/24-31)

19 बृहन्तं मानं वरुणस्वधावः सहस्रद्वारं जगमा गृहं ते।
ऋग्वेदः, 7/88/5

20 तृणैरावृत्ता पलदान्वसाना रात्रीवशाला जगतो निवेशनी।
मिता पृथिव्यां तिष्ठसि, हस्तिनीव पद्वती । अथर्ववेदः, 3/8/1

21 मो षु वरुण मृन्मयं गृहं राजन्नहं गमम् ।
ऋग्वेदः, 7/89/1 (मुका सुक्षत्र मृलय)

22 अथर्ववेदः, 5/10/1-7

23 अधा मही न आयस्यानाधृष्टो पीतये । पूर्भवा शतभुजिः । ऋग्वेदः, 7/15/14

24 शतपथब्राह्मणः, 3/5/1/1

25 अथ यत् पश्चात् वरीयसी भवति । पश्चात् वरीयसी, पृथुश्रोणि वै योषा प्रशंसन्ति । शतपथब्राह्मणः, 3/5/1/11

26 इहैव ध्रुवा प्रतितिष्ठ शालेऽश्वावती गोमती सूनृतावती ।
अथर्ववेदः, 3/12/2

27 बौधायनसूत्रम्, 1/72/81, 90-91

28 कात्यायनशुल्वसूत्रम्, 6/8/10

29 आश्वलायनसूत्रम्, 2/4/9

30 पारस्करसूत्रम्, 3.4, पृ. 314-321

31 इमा मेऽअग्नऽइष्टिका-सन्त्वमुत्रामुष्मिँल्लोके । यजुर्वेदः, 7/2

32 अनुद्वारश्च । गोभिलगृह्यसूत्रम्, 4 प्रपाठक, 7 कण्डिका, श्लो. 11
तत्रावसान प्राग्द्वारं यशस्कामो – प्रत्यद्वारं कुर्वीत।
गोभिलगृह्यसूत्रम्, 4 प्रपाठक, 7 कण्डिका, श्लो. 12

33 गृहद्वारं यथा न संलोकि स्यात् । गोभिलगृह्यसूत्रम्, 4 प्रपाठक, 7 कण्डिका, श्लो. 13

34 वर्जयेत् पूर्पतोऽश्वत्थं.......प्राजापत्य उदुन्वरः । गोभिलगृह्यसूत्रम्, 4 प्रपाठक, 7 कण्डिका, श्लो. 14

35 भारतीय वास्तुकला का इतिहास, पृ.सं. 43

36 नाट्यशास्त्रम्, अ. 2

37 यत्र दिव्यानभिप्रायान्पश्येम विहितांस्त्वया ।
आसुरान्मानुषांश्चैव तां सभां कुरु वै मय ।।
महाभारतम्, सभापर्वः, अ. 220

38 ततः पुण्ये शिवे देशे शान्तिं कृत्वा मारथाः...... लागेर्भगवतीयथा ।। महाभारतम्, आदिपर्वः, अ. 199, श्लो. 28-49

39 शुक्रनीतिः, अ. 1, श्लो. 209-268

40 सुन्दरो ऋक्षमाली....विदध्यात् यत्नो नृपः ।
शुक्रनीतिः, अ. 4, श्लो. 71-205

41 अर्थशास्त्रम्, अधिकरणम्, अ. 8

42 मत्स्यपुराणम्, अ. 252, 257, 268